श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे

# ॥ चतुर्विंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुर्विंशः सर्गः ॥

## वारिणो भिद्यमानस्य किमयं तुमुलो ध्वनिरिति नौकागतस्य रामस्य प्रश्नं श्रुत्वा मुनिना तस्योत्तरदानं मलदकरूषताटकावनानां परिचयं दत्त्वा ताटकावधार्थं श्रीरामस्य प्रेरणं च

ततः प्रभाते विमले कृताह्निकमरिन्दमौ।
विश्वामित्रं पुरस्कृत्य नद्यास्तीरमुपागतौ॥ **1.24.1** ॥

ते च सर्वे महात्मानो मुनयः संशितव्रताः।
उपस्थाप्य शुभां नावं विश्वामित्रमथाब्रुवन्॥ **1.24.2** ॥

आरोहतु भवान् नावं राजपुत्रपुरस्कृतः।
अरिष्टं गच्छ पन्थानं मा भूत् कालस्य पर्ययः॥ **1.24.3** ॥

विश्वामित्रस्तथेत्युक्त्वा तानृषीन् प्रतिपूज्य च।
ततार सहितस्ताभ्यां सरितं सागरङ्गमाम्॥ **1.24.4** ॥

तत्र शुश्राव वै शब्दं तोयसंरम्भवर्धितम्।
मध्यमागम्य तोयस्य तस्य शब्दस्य निश्चयम्॥ **1.24.5** ॥

ज्ञातुकामो महातेजाः सह रामः कनीयसा।
अथ रामः सरिन्मध्ये पप्रच्छ मुनिपुङ्गवम्॥ **1.24.6** ॥

वारिणो भिद्यमानस्य किमयं तुमुलो ध्वनिः।
राघवस्य वचः श्रुत्वा कौतूहलसमन्वितम्॥ **1.24.7** ॥

कथयामास धर्मात्मा तस्य शब्दस्य निश्चयम्।
कैलासपर्वते राम मनसा निर्मितं परम्॥ **1.24.8**॥

ब्रह्मणा नरशार्दूल तेनेदं मानसं सरः।
तस्मात् सुस्राव सरसः सायोध्यामुपगूहते॥ **1.24.9**॥

सरःप्रवृत्ता सरयूः पुण्या ब्रह्मसरश्च्युता।
तस्यायमतुलः शब्दो जाह्नवीमभिवर्तते॥ **1.24.10**॥

वारिसङ्क्षोभजो राम प्रणामं नियतः कुरु।
ताभ्यां तु तावुभौ कृत्वा प्रणाममतिधार्मिकौ॥ **1.24.11**॥

तीरं दक्षिणमासाद्य जग्मतुर्लघुविक्रमौ।
स वनं घोरसङ्काशं दृष्ट्वा नरवरात्मजः॥ **1.24.12**॥

अविप्रहतमैक्ष्वाकः पप्रच्छ मुनिपुङ्गवम्।
अहो वनमिदं दुर्गं झिल्लिकागणसंयुतम्॥ **1.24.13**॥

भैरवैः श्वापदैः कीर्णं शकुन्तैर्दारुणारवैः।
नानाप्रकारैः शकुनैर्वाश्यद्भिर्भैरवस्वनैः॥ **1.24.14**॥

सिंहव्याघ्रवराहैश्च वारणैश्चापि शोभितम्।
धवाश्वकर्णककुभैर्बिल्वतिन्दुकपाटलैः॥ **1.24.15**॥

सङ्कीर्णं बदरीभिश्च किं न्विदं दारुणं वनम्।
तमुवाच महातेजा विश्वामित्रो महामुनिः॥ **1.24.16**॥

श्रूयतां वत्स काकुत्स्थ यस्यैतद् दारुणं वनम्।
एतौ जनपदौ स्फीतौ पूर्वमास्तां नरोत्तम॥ **1.24.17**॥

मलदाश्च करूषाश्च देवनिर्माणनिर्मितौ।
पुरा वृत्रवधे राम मलेन समभिप्लुतम्॥ **1.24.18**॥

क्षुधा चैव सहस्राक्षं ब्रह्महत्या समाविशत्।
तमिन्द्रं मलिनं देवा ऋषयश्च तपोधनाः॥ **1.24.19** ॥

कलशैः स्नापयामासुर्मलं चास्य प्रमोचयन्।
इह भूम्यां मलं दत्त्वा देवाः कारूषमेव च॥ **1.24.20** ॥

शरीरजं महेन्द्रस्य ततो हर्षं प्रपेदिरे।
निर्मलो निष्करूषश्च शुद्ध इन्द्रो यथाभवत्॥ **1.24.21** ॥

ततो देशस्य सुप्रीतो वरं प्रादादनुत्तमम्।
इमौ जनपदौ स्फीतौ ख्यातिं लोके गमिष्यतः॥ **1.24.22** ॥

मलदाश्च करूषाश्च ममाङ्गमलधारिणौ।
साधु साध्विति तं देवाः पाकशासनमब्रुवन्॥ **1.24.23** ॥

देशस्य पूजां तां दृष्ट्वा कृतां शक्रेण धीमता।
एतौ जनपदौ स्फीतौ दीर्घकालमरिन्दम॥ **1.24.24** ॥

मलदाश्च करूषाश्च मुदिता धनधान्यतः।
कस्यचित्त्वथ कालस्य यक्षिणी कामरूपिणी॥ **1.24.25** ॥

बलं नागसहस्रस्य धारयन्ती तदा ह्यभूत्।
ताटका नाम भद्रं ते भार्या सुन्दस्य धीमतः॥ **1.24.26** ॥

मारीचो राक्षसः पुत्रो यस्याः शक्रपराक्रमः।
वृत्तबाहुर्महाशीर्षो विपुलास्यतनुर्महान्॥ **1.24.27** ॥

राक्षसो भैरवाकारो नित्यं त्रासयते प्रजाः।
इमौ जनपदौ नित्यं विनाशयति राघव॥ **1.24.28** ॥

मलदांश्च करूषांश्च ताटका दुष्टचारिणी।
सेयं पन्थानमावृत्य वसत्यत्यर्धयोजने॥ **1.24.29** ॥

**अत एव च गन्तव्यं ताटकाया वनं यतः।**
**स्वबाहुबलमाश्रित्य जहीमां दुष्टचारिणीम्॥ 1.24.30 ॥**

**मन्नियोगादिमं देशं कुरु निष्कण्टकं पुनः।**
**नहि कश्चिदिमं देशं शक्तो ह्यागन्तुमीदृशम्॥ 1.24.31 ॥**

**यक्षिण्या घोरया राम उत्सादितमसह्यया।**
**एतत्ते सर्वमाख्यातं यथैतद् दारुणं वनम्।**
**यक्ष्या चोत्सादितं सर्वमद्यापि न निवर्तते॥ 1.24.32 ॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे चतुर्विंशः सर्गः॥